# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANACOR07T-SANSKRIT (CC7)

## INDIAN SOCIAL INSTITUTIONS AND POLITY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरीलिप्या च लघुबन्धो विरच्यताम्। 5×1 = 5

(क) ऋग्वेदीय-समाजव्यवस्था, (ख) भारतीयसमाजेषु बौद्धानां प्रभावः।

अथवा

अधोलिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरीलिप्या च व्याख्येयः।

(क) पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

(ख) धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

2. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) को नाम धर्मः ? मनुसंहितायां धर्मस्य कति लक्षणानि सन्ति ?

(ख) याज्ञवल्क्यसंहितायाः आचाराध्याये कति धर्माः प्रतिपादिताः ? के च ते ?

(ग) वेदाङ्गानि कतिविधानि ? कानि च तानि ?

(घ) मिताक्षरा केन विरचिता ? मनुसंहितायाः कस्यचित् टीकाकारस्य नाम इष्यते।

(ङ) अभिलेख इति कीदृशः पदार्थः ? अस्य आङ्गलपर्यायः दीयताम्।

(च) को नाम 'दमः' ? 'अस्तेयं' च किम् ?

(छ) एलाहावादप्रशस्तिः केन विरचिता ? अत्र कस्य वंशस्य वर्णनं प्राप्यते ?

### ख-विभागः

3. अधोदत्तेषु प्रश्नेषु यथेच्छमेकः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 10×1 = 10

(क) श्रीमद्भगवद्गीतानुसारं गुणकर्माश्रितं वर्णविभाजनं कथमासीदिति वर्ण्यताम्।

(ख) बृहत्संहितायां स्त्रीप्रशंसा यथा विहिता तथा समुपस्थाप्यताम्।

4. अधः प्रदत्तयोः प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकः श्लोकः संस्कृतेन देवनागरीलिप्या च व्याख्येयः। 5×1 = 5

(क) ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

(ख) जात्युत्कर्षो युगे रोयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्॥

अथवा

अधोलिखितेषु यथेच्छमेकम् आश्रित्य टिप्पनी कार्या – 5×1 = 5

(क) संस्काराः , (ख) पुरुषार्थचतुष्टयम् , (ग) समावर्तनम्।

ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) मनुसंहितानुसारं नृपस्य दैवीउत्पत्तिः वैशद्येन विव्रियताम्।

(ख) गान्धिसंमतस्य सत्याग्रहस्य स्वरूपं वर्ण्यताम्।

6. यथेच्छं विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टिप्पणी कार्या। 5×2 = 10

(क) विदथः , (ख) परिषत् , (ग) योगक्षेमौ , (घ) मात्स्यन्यायः।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरीलिप्या च व्याख्येयम्। 5×2 = 10

(क) अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम्।
सम्प्रमोदमलः कामो भूयः स्वगुणवर्जितः॥

(ख) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(ग) अभीष्टं यदि कस्यापि भवेद्रक्तप्रवाहणम्।
रक्तं स्यादात्मनस्तत्तु न परस्य कदाचन॥

——×——